इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

दिनाङ्क :- 20.07.2025 प्रात: - 06:55

<u>अथ वार्ताः</u>

<u>संसत्सत्रम्</u>

सोमवासरत: आरभमाणस्य संसदः प्रावृट्-सत्रात् प्राक् सर्वकारेण अद्य सर्वदलीया सभा आकारिता अस्ति। सभायां, सर्वकारः संसदः उभयोः सदनयो: कार्यजातं सुष्ठुतया निर्बाधं च प्रवर्तयितुं सर्वाणि अपि राजनैतिक-दलानि अध्यर्थयिष्यति। सत्रावधौ उभयोः सदनयोः आहत्य एकविंशति-सङ्ख्याकानि उपवेशनानि भविष्यन्ति। संसदीयः कार्यमन्त्री किरेन-रिजिजुः वार्ताहरान् असूचयत् यत् सर्वकारः संसदि उत्थापितेषु महत्त्वपूर्ण-विषयेषु चर्चार्थं सन्नद्धम् अस्ति। प्रावृट्-सत्रम् एतत् जुलाई-मासस्य एकविंशति-दिनाङ्कात् आरभ्य अगस्त-मासस्य एकविंशति-दिनाङ्कं यावत् आयोजयिष्यते। सत्रे अनेकानि महत्त्वपूर्णानि विधेयकानि चर्चायै अभ्युपगमनाय च प्रस्तोष्यन्ते।

<u>विपक्ष-सम्मेलनम्</u>

संसदः प्रावृट्-सत्रात् प्राक् विपक्षिदलानाम् इंडियेति-महासंयुत्या अन्तिमरूपेण तदीय-रणनीति-निर्धारणाय दृश्य-श्रव्य-संचार-तन्त्रीयम् एकं सम्मेलनम् आयोजितम्। सभायां काङ्ग्रेस्, तृणमूल-काङ्ग्रेस्, समाजवादी-पार्टी, उद्धव-ठाकरे-सन्नीत-शिवसेना, द्रविडमुन्नेत्रकडकम्, मार्क्सवादि-माकपा-दलानि समेत्य अन्यानि अपि सहयोगि-दलानि उपस्थितानि आसन्। सभायां काङ्ग्रेस्-अध्यक्षः मल्लिकार्जुन-खडगे, लोकसभायां विपक्षनेता राहुलगान्धी, सपा-नेता रामगोपाल-यादवः चेत्यादयः उपस्थिताः आसन् । वार्ताहरैः सह संवादावसरे काङ्ग्रेस्-सांसदः प्रमोद-तिवारी अवदत्

यत् सम्मेलने पहलगामातङ्कवाद्याक्रमणं, ऑपरेशन्-सिन्दूर-इत्यभियानं चेत्यादि-विषयान् संसदि उत्थापयितुं दलानाम् मध्ये सहमतिः जाता।

<u>उपराष्ट्रपतिः</u>

उपराष्ट्रपतिः जगदीप-धनखरः अवदत् यत् भारतं स्वकार्यं कथं सम्पादयेत् इत्येतत् न कोऽपि निर्देष्टुं शक्नोति। गतवासरे सः उपराष्ट्रपति-एन्क्लेव्-स्थले चतुर्विंशत्यधिक-द्विसहस्रतमाब्दीयानां भारतीय-रक्षा-संपत्ति-सेवा-प्रशिशिक्ष्वधिकारिणः सम्बोधयन् एवम् अभ्यभाषत।

<u>अमितशाहः/उत्तराखण्डम्</u>

केन्द्रीय-गृहमन्त्री अमितशाहः रुद्रपुरे ह्यः उत्तराखण्डसर्वकारस्य एकसप्तत्यधिक-द्विशतोत्तरैकसहस्र-कोटिरूप्यकाणां विविधकार्याणाम् उद्घाटनं शिलान्यासं च अकरोत्। श्रीशाहः पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षस्य उत्तराखण्ड-निवेशमहोत्सवे देशस्य निवेशकैः उद्योगिभिः च साकं संवादं कृतवान्। अस्मिन् अवसरे जनान् सम्बोधयन् गृहमन्त्री अवदत् यत् यावत् उत्तराखण्ड-सदृशानां लघुराज्यानां प्रगतिः न भविष्यति तावत् देशस्य विकासः न भविष्यति, अतः केन्द्रसर्वकारेण लघुराज्यानां पूर्वीय-राज्यानां च विकासम् अभिलक्ष्य विशेषः अवधानः कृतः अस्ति।

<u>संस्कृत-साप्ताहिकी</u>

प्रियाः श्रोतारः, संस्कृत-जगता सम्बद्धैः विभिन्नैः क्रिया-कलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ्.एम्.गोल्ड्-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति। भवन्तः सर्वे यथाकालं श्रोतुं प्रभवन्ति।

महिला-क्रिकेट्

भारत-इंग्लैण्डयोः मध्ये अनुवर्तमानायां स्पर्धा-त्रयात्मिकायाम् एकदिवसीय-महिला-क्रिकेट्-क्रीडा-मालिकायां गतरात्रौ लन्दने लॉर्ड्स-क्रीडाङ्गणे आयोजिते द्वितीये द्वन्द्वे इंग्लैण्डेन भारतम् अष्टाभिः क्रीडकैः पराजितम्। इतः पूर्वं साउथेम्पटने भारतीयदलेन प्रथमा स्पर्धा जिता आसीत्। शृङ्खलायाः तृतीयम् अन्तिमं च द्वन्द्वं मङ्गलवासरे चेस्टर-ले-स्ट्रीट्-इत्यत्र आयोजयिष्यते।

।। इति वार्ता:।।